छत्रपतिः शिवाजी महाराजः

(संस्कृत)


छत्रपतिः शिवाजिमहाराजः

१९ फेब्रुवरी १६३० तमः आंग्लदिनाङ्कः। पश्चिमायने सूर्यः। महाराष्ट्रस्य शिवनेर दुर्गे दुन्दुभः दुन्दुभितः। सानेयी-शृङ्ग-शङ्खानां निनदः निनादितः। यतः जिजा-माता प्रसूता, पुत्ररत्नं च लब्धवती। अयम् एव श्रीशिवाजिमहाराजः। जिजापतिः श्रीशहाजीराजः बीजापुरस्य सुलतानपक्षे रणाङ्गणे युद्धार्थं गतवान् आसीत्। शतशः वर्षाणि व्यतीतानि। परं मराठाजनानां प्रदेशे विदेशीयशासकाः शासनं कुर्वन्ति स्म। शिवाजिराजस्य जन्मसमये बीजापुरस्य सुलतानः आसीद् एव। तथा च दिल्ली इत्यत्र मुगलसम्राट्, मराठाजनानां प्रदेशस्य तटवर्तिविभागे हबशी-सिद्दी-जोहारः च अपि।




...नेर दुर्गद्वये –
प्रकाशमाने नयने, सरला नासिका, नासिकाग्रभागः कश्चित् निशितः च।
जिजामाता शिवायिदेवीभक्ता। अतः अस्य नामधेयं शिवाजिः इति कृतम्।
बालशिवाजिः अध्ययनयोग्यः जातः। अस्य पिता शहाजीराजः। अनेन शिवाजिः बीजापुरे आनीतः। जिजामाता अपि आनीता। अत्र दादाजी-कोण्डदेवः प्रख्यातः शिक्षकः। अस्य अध्यापने शिवाजिराजाय शिक्षणदानं समारब्धम्।
अद्यतः अयं तव अभिभावकः।
वत्स, भगवान् तव भद्रम् अनुतिष्ठतु। त्वं सफलः सुफलः च भव, सुकीर्तिं च आप्नुहि।
दादाजी-कोण्डदेवेन अयं बालशिवाजिराजः पाठितः। अयं पठने लेखनेच सिद्धः समर्थः च जातः।
युद्धविद्या अपि अधिगता।
साधु, लक्ष्यम् अपि संसाधितम्!


अश्वारोहणम् अपि
अस्य अश्वारोहणम् अपि कौतुकास्पदम्।
साधु, शिवराज, साधु!
शिवराजस्य बुद्धिः अपि जिज्ञासायुक्ता।
गुरुदेव, अस्मत्तः मम पिता सततं दूरं किमर्थं तिष्ठति?
अपि जानाति भवान्? एषः महावीरः अस्ति। सततं रणाङ्गणे एव भवति।
परकीयपक्षे किमर्थं युध्यते सः? एवं किमर्थं करोति? किमर्थम्? किं कारणम्?
जिजामाता बालशिवाजिराजाय रामायण-महाभारतयोः कथाः कथयति स्म।
भगवान् कृष्णः अर्जुनं वदति- कर्तव्यपालने वीराः प्राणान् अपि त्यजन्ति मृत्युं च आलिंगन्ति।
मातः किं मम कर्तव्यम्?


अपि पितृदेवेन सह विदेशीयशासक-पक्षे युद्धं करणीयम्? अथवा स्वदेशीयानां कृते विदेशीयशासकानां विरोधे युद्धं करणीयम्?
स्वदेशवासीयानां पक्षे त्वया युद्धं करणीयम्।
अपि सुलतानस्य विरोधे?
हं, यदि आवश्यकता भवेत्।
यद् उचितं मम, तद् एव मया अत्र प्रदर्श्यते।
जिजामाता जानाति यत् स्वपुत्रः शिवाजिः अस्वस्थचित्तः।
तावत् पितृदेवः कथम्? किं च?
तव पितृदेवः अपि स्वातन्त्र्यप्रियः यथा अन्ये। परम् अयं सुदीर्घसमयतः सुलतानस्य सेवायां निमग्नः अस्ति। अतः अस्य मनः अधुना सुलतानस्य विरोधकरणे सिद्धं न भवति।



एकस्मिन् दिने-
दादाजी-कोण्डदेव, सुलतानद्वारा पुणे-जिल्हाधीशपदे तव नियुक्तिः मया कारिता वर्तते।
भवता शिवाजिराजं तस्य जननीं जिजां च तत्र नेतव्यम्।
अतीव सुष्ठु जातम्।
राजकुमार-प्रवास-सदृशः अस्य अयं प्रवासः जातः।
एषा रमणीया धरणी अस्मदीया अस्ति। एतस्याः महत्सु दुर्गेषु अस्माकम् अधिकारः भवतु।
पुणे इत्यत्र शिवाजिराजस्य मित्रपरिवारे सह्याद्रेः मुग्धाः बलवन्तः च बालकाः। एतैः सह शिवाजिराजः युद्ध-क्रीडां क्रीडति स्म।
एते प्रतिज्ञाबद्धाः भवन्ति। यावत् स्वातन्त्र्यं न हि, तावत् स्वस्थचित्ताः अपि न हि इति एतैः सर्वैः शपथग्रहणं कृतम्।


दादाजी-कोण्डदेवः नामधारि-अधिकारी आसीत्। परं वस्तुतः पुणेविभागस्य प्रशासनं स्वहस्ताङ्कितवान् अयम्। अस्य एव सन्निधौ वर्धमानः शिवाजिराजः संकल्पं कृतवान्।
प्रथमतः अस्माभिः दुर्गाणि स्वाङ्कितानि करणीयानि।
कः अपि अस्माकं विरोधे न तिष्ठति। बहवः अधिकारिणः अस्माकं साहाय्ये तिष्ठन्ति।
अहम् अस्य मार्गावरोधं न करोमि।
सर्वप्रथमं शिवाजिराजेन महत्त्वपूर्णं तोरणा-दुर्गं जितम्।
हे सहकारिणः नायं समयः आनन्दप्रदर्शनस्य। अयं तु संघर्षस्य श्रीगणेशः।
ततः जिजामाता आशिर्वचनं ददाति...
साधु, शिवराज़ साधु! अद्य त्वया एकं दुर्गं जितम् इति मया श्रुतम्।
अम्ब, एतत् कार्यं सुकरम् आसीत्। सुलतानस्य सिद्धता सुदृढा नासीत्। अधिकारिणांच सहायता अपि अस्माभिः प्राप्ता।


शिवाजिराजस्य गतिविधीन् दृष्ट्वा सुलतानः क्रोधाविष्टः जातः यथा प्रदीप्तः अग्निः।
हे शिवराज, सुलतानेन तव पिता शहाजी-राजः कारागृहे निबद्धः। अनेन तव शिक्षा भविष्यति इतिअस्य उद्देशः।
लम्पट-सेनापति-अफझल-खानेन शहाजीराजः शृङ्खलाभिः निगडितः।
सुलतानेन च अस्मान् आक्रमितुं सेनाः अपि प्रेषिताः।
मम पिता कारागृहे स्थापितः। अतः शिक्षा-ग्रहणस्य आवश्यकता सुलतानस्य एव भवति।
सुलतानस्य सेनाः तत्र आगताः तदा शिवाजि-राजः पुरन्दर-दुर्गे आसीत्।
स्वराज्यसैनिकाः, गच्छत। प्रकर्षेण प्रतिकारं कुरुत।
एकस्मिन् लघुदुर्गे केषांचन शत्रुसैनिकानां निवेशः आसीत्। तत्र शिवसैनिकैः सहसा आक्रमणं कृतम्। शत्रुसेनाः च पराजिताः।


यदा शत्रुणा पुरन्दरदुर्गे आक्रमणं कृतम् तदा स्वराज्यसैनिकैः सर्वप्रकारकप्रयत्नैः शत्रुसेनाः पराभूताः कृताः ।
अनेन सुलतानेन शिक्षा लब्धा ।
शहाजीराजः विमुक्तः कर्तव्यः। अस्य यथापूर्व सम्मानः अपि करणीयः।
परं प्रत्यपकाराग्निः अन्तःस्थः ज्वलति स्म। कतिपय-समयानन्तरम् एवबीजापुरस्य शक्तिशाली सेनापतिःअफझल-खानः विशालसेनासहितः शिवराज्ञोपरि आक्रमणकरणे प्रवृत्तः जातः ।
शिवाजिः पर्वतमूषकः। अहम् एनं पर्वतमूषकं सजीवं वा मृतं वा निगृह्णामि।


अयं बलाढ्यः अफझलखानः विशालसेनासहितःशिवराजस्य प्रदेशे आक्रमणं समारब्धवान्...
एतद् भवानीदेवी मन्दिरम्। अत्र एव शिवाजिः पूजनं करोति। एतत् मन्दिरं पातयत।
सा एषा अफझलखानस्य सेना। वाई इत्यत्र गिरिकन्दरप्रदेशे सेनासहितःअफझल-खानः निवेशम् अकरोत्। सैनिकाः च समीपवर्तिप्रदेशे लुण्ठा-लुण्ठि प्रारभन्त।
एतस्मिन् समये शिवराजः वाई-समीपे प्रतापगढ इति दुर्गे आसीत्।
अफझलखानः सः एव एषः मम जनकं शहाजीराजं निगडितवान् ?
जी हुं, महाराज, सःएव एषः वर्तते।
ततः अफझलखानस्य दूतेन सन्देशः आनीतः..
आत्मसमर्पणं कुरु अन्यथा मृत्युं गच्छसि।


शिवाजीराजेन चातुर्येण कार्यं संसाधितम्।
अफझलखानः मम पितृसमानः अस्ति। स्वसामर्थ्येन मां किमर्थं भापयति ?
अपि भवान् अस्य शिबिरम् आगमिष्यति ?
जी, न हि। सः प्रतापगढ-दुर्गतः प्रति आगच्छतु। अहं प्रतापगढ दुर्गतः अवतरामि। मार्गार्धे च अस्य समागमं करोमि।
एतदन्तरे एका चिन्ताजनी सूचना प्राप्ता।
“अफझलखानः मां हन्तुम् इच्छति।” अतः अहं पूर्णसिद्धतां कृत्वा एव तत्र गमिष्यामि।
शिवाजिराजः कवचं धृतवान्। अस्य उपरि च अङ्गवस्त्रम् अपि। व्याघ्रनखाः शिरस्त्राणम् अपि च। ततः शिवाजिराजः भवानीमन्दिरं गच्छति। भवानीदेवीं च प्रार्थयते।


शिबिकायाम् अफझलखानः उपविष्टः।
मूषकेण निर्दिष्टम् आसीत्। सेना मा आगच्छतु। भीरुः एव अस्ति।
एषः शिवाजिराजः रक्षकद्वयेन सह अस्य समागमाय दुर्गाद् अवतरति।
तव अन्तःकालः समुपस्थितः।
वत्स, आगच्छ।
अफझलखानः कृतकेन स्नेहेन शिवाजिराजाय आलिंगनं ददाति।
पृष्ठे प्रहर्तुं छुरिका उद्यम्यते।


तदा शिवाजिराजः वामहस्तेन खड्गम् अपहरति। दक्षिणहस्तं च उद्यच्छति।
शिवाजिराजस्य दक्षिण हस्तांगुलिषु व्याघ्रनखाः संबद्धाः आसन्। एतैः व्याघ्र-नखैः शिवराजेन अफझलखानस्य उदरं विदीर्णम्।
अयि अल्लाह !


अफझलखानः भूमौ न्यपतत् । आक्रोशति च...


मृतः मृतः ।
शिवाजि-महाराजस्य जयः ।



ततः वनप्रदेशे निभृताः शिवसैनिकाः गर्जन्तः एव शत्रुसैनिकान् अभ्याक्राम्यन् ।
हर हर महादेव !


सूर्यास्तपर्यन्तं तुमुलं युद्धं चलितम् ।
धावन्ति प्रधावन्ति च शत्रु-सैनिकाः
रणक्षेत्रम् अस्माभिः कृतम् हस्तगतम्! रणाङ्गणे अस्माकं प्रभुत्वम्।


सर्वत्र आनंदोत्सवः समाराजितः ।
अफझलखानस्य मस्तक विषये किं करणीयम् ?
सकबन्धः 'दफन' इति अन्त्यविधिः करणीयः सम्मानेन।
एषा महती व्यक्तिः। मृतशत्रोः अवमाननम् अपि अनुचितं मन्यते।


मम वत्स ! अपि युद्धं समाप्तं ननु? भवानीदेव्या भवान् रक्षितः।
हे अम्ब ! विपुला सम्पत्तिः अपि हस्तगता जाता।


शिवाजिमहाराजेन महान् विजयः प्राप्तः। अनेन समयस्य सदुपयोगः कृतः।
अस्माभिः शीघ्रम् एव आक्रमणं कर्तव्यम्।


प्रलयमारुतवेगेन च त्रयोदशदिनेषु सहस्रार्धक्रोशात्मकः प्रवासः कृतः। स्थाने स्थाने च शत्रुः पराजितः स्वराज्यस्य च विस्तारः अपि कृतः।


अन्ततः अनेन 'पन्हाळा' इति दुर्गम् आक्रान्तम्। इदं महत्त्वपूर्णं दुर्गम्। ततः च...
इदं पन्हाळा इति दुर्गम् अपि हस्तगतं जातम् परं बाजीप्रभो! द्रष्टव्यम्...
सेनासागरः एव अस्मान् प्रत्यागच्छति!


सूर्यास्तपर्यन्तं तुमुलं युद्धं चलितम्।
धावन्ति प्रधावन्ति च शत्रु-सैनिकाः
रणक्षेत्रम् अस्माभिः कृतम् हस्तगतम्! रणाङ्गणे अस्माकं प्रभुत्वम्।


सर्वत्र आनंदोत्सवः समाराजितः।
अफझलखानस्य मस्तक विषये किं करणीयम्?
सकबन्धः 'दफन' इति अन्त्यविधिः करणीयः सम्मानेन।
एषा महती व्यक्तिः। मृतशत्रोः अवमाननम् अपि अनुचितं मन्यते।


मम वत्स ! अपि युद्धं समाप्तं ननु? भवानीदेव्या भवान् रक्षितः।
हं अम्ब ! विपुला सम्पत्तिः अपि हस्तगता जाता।
शिवाजिमहाराजेन महान् विजयः प्राप्तः। अनेन समयस्य सदुपयोगः कृतः।
अस्माभिः शीघ्रम् एव आक्रमणं कर्तव्यम्।
प्रलयमारुतवेगेन च त्रयोदशदिनेषु सहस्रार्धक्रोशात्मकः प्रवासः कृतः। स्थाने स्थाने च शत्रुः पराजितः स्वराज्यस्य च विस्तारः अपि कृतः।
अन्ततः अनेन 'पन्हाळा' इति दुर्गम् आक्रान्तम्। इदं महत्त्वपूर्णं दुर्गम्। ततः च...
इदं पन्हाळा इति दुर्गम् अपि हस्तगतं जातम् परं बाजीप्रभो! द्रष्टव्यम्...
सेनासागरः एव अस्मान् प्रत्यागच्छति!


महाराज! अयं सिद्दीजोहारः अस्माकं शत्रुः। तटवर्तिप्रदेशस्य शासकः।
अपारसमुद्राद् आगताः च 'फिरंगी' सैनिकाः अस्य सहायम् अनुतिष्ठन्ति।
सिद्दीजोहारस्य सैनिकैः पन्हाला दुर्गं परिवेष्टितम्। शिवसैनिकानां मार्गविरोधः च कृतः।
कतिपयाः मासाः व्यतीताः। तथापि मराठासैनिकाः महता शौर्येण दुर्गं रक्षन्ति स्म।
वर्षायाः प्रारम्भसम्भवः। ततः...
धारासारैः जलं वर्षति स्म।
एतादृश्याम् अवस्थायां कति समयं यापयितुं वयं समर्थाः?
अत्र चातुर्येण कार्यं साधनीयं भवतु।


किंवदन्ती प्रचालिता जाता । सायंकाले ...
शिवाजिराजः इच्छति- 'दुर्गं त्यक्तव्यम्' इति।
तथा अस्तु ! वयं विशालगढ इति दुर्गे आक्रमणं कुर्मः।
परं रात्रौ-
शिवाजिः दुर्गतः निर्गतः इति कथ्यते।
शिवाजिमहाराजः वस्तुतः एव सहस्रैकमितविशेषसैनिकैः सह पन्हाळा दुर्गतः निर्गतः, वातवर्षयाम् च अपि विशालगढं प्रति प्रस्थितः।
अपि एते सावधानाः ननु ?
जी हं, एते अस्मान् अभिधावन्ति।
अत्यविस्तृता एषा दरी...
एनां दरीम् अपि उल्लंघितवान् विशालगढं च प्राप्तवान्।
महाराज, भवान् गच्छतु, पर्वतमध्यपथः अस्माभिः संरक्ष्यते।
बाजीप्रभो, भवान् महान् योद्धा।


षट्शतमित मराठा सैनिकसहितेन बाजीप्रभुणा महता शौर्येण शत्रुसैनिकानां गत्यवरोधः कृतः युद्धं च तुमुलं कृतम्।
परम् अधुना बाजीप्रभुः जीवितुम् असमर्थः।
बाजीप्रभुः घातकरूपेण व्रणितः।
दूरतः शतघ्नीध्वनिः ध्वनितः जातः अर्थात् स्वामी शिवाजि-महाराजः विशालगढ-दुर्गं प्राप्तवान्।
अधुना अहं शान्तिम् आश्रित्य म्रिये।
पन्हाळादुर्गे सिद्दीजोहारस्य क्रोधः तीव्रतमः जातः।
पश्यत, एतत् पत्रम् आगतं सुलतानेन लिखितं च... सिद्दीजोहारेण मतिपूर्वम् एव शिवाजिः विमोचितः प्रधावयितः च।
सिद्दीजोहारेण नैव ज्ञातम् आसीत् यत् पन्हाळादुर्गे शिवसैनिकाः नात्यधिकाः। शिवाजिमहाराजः नेच्छति यद् एते व्यर्थतया एव मृत्युमुखे निपातनीयाः इति। अतः शिवाजिमहाराजेन आज्ञा प्रेषिता यत् पन्हाळदुर्गं शत्रुस्वाधीनं करणीयम् इति।
रिक्तं दुर्गं गृहीत्वा किं करणीयम्?


यदा शिवाजिमहाराजः विशालगढतः पुणे इत्यत्र प्रत्यागतः तदा पुणे इत्यत्र पुनः एकः बलवान् शत्रुः आगतः आसीत्। दिल्लीश्वरः औरंगजेबः इत्यस्य सेनापतिः शाइस्ताखानः सः एषः।
यस्मिन् लाल-भवने शिवाजिमहाराजः बाल्यात् प्रभृतिः वसति स्म, तत्र एव अधुना शाइस्ताखानः निव-सति।
यदि शिवाजिः अत्र स्यात् तदा साधु भवेत्।
शाइस्ताखानेन नगराद् बहिः अपि रक्षकाः स्थापिताः आसन्।
ओः! शोभायात्रा वर्तते। गच्छन्तु नगरे।
यदा शोभायात्रा लालभवनसमीपे आगता तदा–
'आक्रमणं कुरुत'!


कोष्ठे कोष्ठे अपि अन्वेषणम्।
अधुना अन्ते-
आश्चर्यम्! चमत्कारक: शिवाजि-महाराज: !
भयभीत: शाइस्ताखान: पलायति च।
शाइस्ताखान: पलायित: परम् अस्य अङ्गुलित्रयं शिवाजिमहाराजेन छिन्नम्।
अनया घटनया शाइस्ताखानस्य उत्साह: निरस्त:।
अहो, शिवाजि: पिशाच-प्रेतवद् आगच्छति निर्गच्छति च।


शिवाजिमहाराजेन कतिपयसमयः शान्तितया यापितः। परम्...
यावत् सम्पूर्णं स्वातन्त्र्यं न हि, तावद् अस्माकं शान्तिः अपि न हि।
महाराज! वयं धनम् इच्छामः। यतः युद्धं बहुमहार्घं भवति।
गुप्तचराणां कथनम् एतद् यत् सुरतनगरे विपुलं धनं वर्तते।
जी हं, फिरंगीजनैः अस्माकं देशस्य लुण्ठनं कृत्वा तत्र सर्वा सम्पत्तिः संग्रहिता विद्यते।
औरंगजेबस्य भव्यं नौकातलम् अपि तत्र अस्ति।
तावत् चलन्तु सुरतनगरम्!



शिवाजिमहाराजेन विद्युद्वेगेन सुरतनगरे आक्रमणं कृतम्।
अनेन चत्वारि दिनानि यावद् लुण्ठालुण्ठि सुरत-नगरे कृतम्।
कः अपि निर्धनिकः त्रस्तः मा भवतु, का अपि स्त्रीः त्रस्ता मा तिष्ठतु।
यथावेगेन एतेषाम् आगमनं तथा निर्गमनं च अपि।
औरंगजेबः क्रोधाविष्टः जातः।
अस्य निपातः भवतु। जयसिंहराज, त्वम् अस्माकं शक्तिशाली सुभेदारः इति। अतः गच्छ, शिवाजिं पराभूतं कुरु।
यथा आदिशति सम्राट्।


राजा जयसिंहः इटालियनद्वारा प्रशिक्षित-शतघ्नी-सेनादलेन सह प्रस्थितः। प्रस्थानमार्गे अनेन बहुविधानि दुर्गाणि जितानि च।
इदं प्रख्यातं पुरन्दर-दुर्गम्। अत्र आक्रमणं कर्तव्यम्।
शिवाजिमहाराजेन जयसिंहेन सह अस्थायि-सन्धिः कृतः।
शिवराज, त्वं शूरः वीरः च असि।
राजन्, त्वं मत्तः अपि अधिकः।
परन्तु, भवान् मुगलैः क्रीतः।
सम्राड् आग्रानगरे अस्ति। तेन त्वम् आग्रानगरे सन्दर्शनार्थं निमन्त्रितः। तव पुत्रं सम्भाजिम् अपि तत्र नय।
मम सुरक्षायाः उत्तरदायित्वं केन स्वीक्रियते?
एतद् मम उपरि न्यस्तव्यम्। अहं त्वां पुत्रवत् मन्ये। सम्राजः च नीतिः अपि स्वच्छा।



महाराज, एतत् कथनं सम्यग् नास्ति।
जयसिंहस्य कथने कथं विश्वासः करणीयः?
अन्यः च कः अपि उपायः नास्ति। अस्माकं परिस्थितिः अपि सुयोग्या न विद्यते। अस्माभिः विश्वासः करणीयः। एतत् मन्तव्यं च।
आग्रानगरे मम पुत्रः रामसिंहः भवद्विषये सावधानम् अनुतिष्ठेत्।
केवलं प्रजाजनविषये मम चिन्ता वर्तते। मम मन्त्रिगणः सदैव प्रजाजनानां हिताहिते अनुतिष्ठतु सावधानेन।
तथा भवतु राजन्!
मासद्वयस्य अस्यां प्रवासयात्रायाम् अस्य शिवाजिमहाराजस्य यत्र यत्र प्रस्थानं जातं तत्र तत्र जनाः साश्चर्येण एनम् अवलोकयन्ति स्म।
सः एषः एव शिवाजि-महाराजः।
सम्राजः समागमार्थं प्रस्थितः अयम्।
अपि सम्राट् कपटजालं न न्यतनोत्?


अन्ततः च...
भवतः स्वागतम्। भवान् अत्र अतिथि-गृहे तिष्ठतु।
रक्षकाः किमर्थं समुपस्थापिताः वर्तन्ते?
भवतः सम्मानार्थं सुरक्षार्थं च।
अग्रिमे दिने...
अपि भवान् रामसिंहः?
जी हं, अद्य सम्राजः जन्मदिवसः अस्ति। राजसभा भवति। अत्र भवान् अपि निमन्त्रितः।
पिता पुत्रः च साशंकं राजसभायां समुपतिष्ठतः।


राजसभायां सम्राजा एतयोः नयननिक्षेपणम् अपि न कृतम्।
निम्नस्तरीय- अधिकारिषु एतयोः समुपस्थापनं जातम्।
पितृदेव, भवता दृष्टम्? सम्राजा अन्यजनेभ्यः उपहाराः दत्ताः ते च सम्मानिताः च कृताः आवयोः उपेक्षा एव कृता।
शिवाजिमहाराजः क्रोधा- विष्टः। अस्य मुखं च रक्तरञ्जितवत् जातम्।
हेतुपुरस्सरः अयम् अपमानः कृतः अनेन। अनेन ये जनाः अत्र सम्मानिताः ते मया परा- जिताः आसन्।


कोपाविष्टः एषः सपुत्रः तत्रतः निर्गतः।
कृपा कर्तव्या–
मा कथय किमपि।
शिवाजिमहाराजस्य अनेन आचरणेन सम्राट् चकितः जातः।
विचित्रः एव अयं मानवः। अयं श्वः निमन्त्रणीयः। अयं च अस्य पुत्रः च मया सम्मानितौ क्रियेते।
परन्तु समयः अतीतः।
सम्राजे निवेदयतु। अहं रुग्णः अस्मि ज्वरेण। अतः आगन्तुम् असमर्थः।
अतः सम्भाजिः एकलः एव राजसभायाम् उपस्थितः। असिदानेन अस्य सम्मानः कृतः।
सम्यक् प्रकारेण अवनतं भूत्वा त्वया शिरोनमन-वन्दनं नैव कृतम्।
केवलं भगवतः च मातुः च पुरतः अहं शिरः अवनतं करोमि। न अन्यस्य पुरतः।


शिवाजिराजस्य मनसि सम्राजः नीतिविषये सन्देहः आसीत्।
मया ज्ञातं यत् तेन कपट-जालं विततम्। सम्राड् अस्मान् प्रतिबन्धान् कर्तुम् इच्छति।
पितृदेव, अस्मान् घातयेत्।
शिवाजिमहाराजेन कृतकरुग्णतायाः व्यपदेशः कृतः आसीत्। अयं व्यपदेशः उपयुक्तः जातः। अनेन पलायनस्य संकल्पः कृतः।
वयं प्रतिदिनं मिष्टान्नं वितरामः पिटक-पूर्णम्।
एतत् मिष्टान्नं निर्धनिकानां कृते वर्तते।
भगवता शीघ्रम् एव अस्माकं शिवाजि-महाराजः निरोगतां नेतव्यः।


पिटकः दृष्टः।
गच्छतु।
एतेषां निरीक्षणस्य आवश्यकता न वर्तते। मिष्टान्नपूर्णः पिटकः नीयते यथा नित्यम्।
एकस्मिन् दिने पिटकेषु अन्यत् किमपि अवर्तत।
वत्स, एतस्मिन् पिटके उपविश। पर्याप्तिः विद्यते।
रक्षकैः पिटकाः नैव दृष्टाः।


एतदनन्तरम्...
अपि शिवाजिं सम्भाजिंच भवन्तः दृष्टवन्तः?
अधुना एव अपश्याम। निभरनिद्रायां निद्रितौ एतौ।
आः अत्र तु कः अपि नास्ति।
औरंगजेबस्य कोपाग्निः प्रज्वलितः।
युष्माभिः शिवाजिः निर्मुक्तः कृतः। सः पलायितः च। युष्माकं शिरच्छेदः भविष्यति।
सर्वासु दिक्षु अश्वारोहकाः सावेगेन प्रेषिताः। परं शिवाजिः न प्राप्तः।


एतस्मिन् समये विजनस्थले...
महाराज, भवतः कृते अश्वाः सिद्धाः वर्तन्ते।
बहवः धन्यवादाः, बहवः धन्यवादाः।
पुनः पुनः वेषपरिवर्तनं कृत्वा शिवाजिमहाराजः दक्षिणप्रदेशे आगतः। स्थाने स्थाने जनैः अस्य सहायम् अनुष्ठितम्।
सम्भाजिः कतिपयदिनानि भवतः समीपे स्थास्यति।
महाराज, एतत् मम सौभाग्यम् एव।
शिवाजिमहाराजः सकुशलः गृहं प्रत्यागतः।
अस्माकं प्रियः महाराजः प्रत्यागतः, सकुशलः च अस्ति।
भगवता कृपा कृता।

अनेन प्रकारेण आग्रातः साहसपूर्वकं शिवाजिमहाराजः प्रत्यागतः। ततः कतिपयवर्षा-नन्तरम् शोभातिशयेन सोत्साहेन च अस्य राज्याभिषेकोत्सवः समाराजितः।



राज्याभिषेकानन्तरम् अनेन केवलं पञ्चवर्षाणि शासनं कृतम्। तथापि मराठाजनानां या शक्तिः अनेन संगठिता सुस्थापिता च सा अनेकवर्षैः अपि तथा एव स्थिता जाता।